## 2.6.2 कार्यक्रम के परिणामों की प्राप्ति, कार्यक्रम के विशिष्ट परिणामों और पाठ्यक्रम के परिणामों का मूल्यांकन संस्थान द्वारा किया जाता है

## *Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution*

विश्वविद्यालयस्य पाठ्यक्रमाः भारतीयज्ञानपरम्पराश्रिताः वर्तन्ते। भारतपरम्परा, संस्कृतिः, वेदेषु शास्त्रेषु च निहिताः विचारधाराः इत्येते बिन्दवः पाठ्यक्रमेषु बिम्बिता भवन्ति। पाठ्यक्रमाणां निर्माणम्, निष्पत्तिः परिणामानां मूल्याङ्कनम्, निष्पत्तेः मूल्याङ्कन म्मापनम् इतीमानि चाक्रिककार्याणि यथाकालं विधीयन्ते।

**पाठ्यक्रमस्य परिचयप्रदानम्**प्रवेशकाले व्याकरणम्, साहित्यम्, ज्योतिषम्, वेदान्तः इत्यादीनां पाठ्यक्रमगतानां वैकल्पिकानां शास्त्रविषयाणां सामान्यपरिचयः क्रियते सम्बद्धपाठ्यक्रमस्य समितेः सदस्याः तत्कार्यं सम्पादयन्ति छात्रेण चीयमानस्य पाठ्यक्रमस्य पाठ्यपत्राणामपि परिचयः क्रियते। पाठ्यक्रमाणां विशिष्टं प्रयोजनं किमित्यपि उच्यते।

**पाठ्यांशपूरणम्** अध्यापकेन निर्दिष्टसमये पाठ्यांशः समापनीयः अतः प्रत्येक विषयस्य अध्यापकेन पाठ्यपत्रे प्रतिमासं पाठनीयस्य अंशस्य विभागः क्रियते मासे मासे निर्दिष्टः पाठ्यांशः पूर्यते तेन समये पाठ्यांशपूरणं सम्भवति। पुनरवलोकनम्, परीक्षासिद्धता च तत्र कर्तुं सौविध्यं वर्तते।

**उपस्थितिः** कक्ष्या-अध्यापनेछात्राणाम् उपस्थितिः पाठ्यक्रमस्य परिणाम निर्धारयति। प्रतिशतं पञ्चसप्ततिः उपस्थितिः न्यूनतमत्वेन अपेक्षिता परीक्षायाम् उपवेशनाय।

**दत्तकार्यम्**छात्राः निर्दिष्टे पाठ्यविषये पीपीटी द्वारा विषयोपस्थापनम्ग्रन्थानाम् आवलीनिर्माणम्, लघुसमीक्षा इत्यादि कार्याणि कुर्वते।
**अतिरिक्तकक्ष्याः** आन्तरिकमूल्याङ्कनेन छात्राणां **क्रमितमापनं** भवति। सामन्यतया ते मन्दाध्येतारः, मध्यमाध्येतारः. अग्रेसराध्येतारः इतिविभक्ताः भवन्ति। आद्ययोः स्तरोन्त्रयनार्थं क्रियमाणः यत्त्रः परिणामे मुख्यपात्रं वहति।

**सत्रीयपरीक्षाः** छात्राणां परीक्षाफलेन पाठ्यक्रमाणांगुणः निर्धार्यते। विश्वविद्यालयद्वारा परीक्षा, मूल्याङ्कनम्, फलितांशस्य पट्टिकानिर्माणम्, तस्य घोषणा, अङ्कतालिकाप्रदानम्चक्रियते। एताभिः अवान्तरक्रियाभिः पाठ्यक्रमाणां परिणामाः ज्ञातुंशक्यन्ते। सञ्चालितेषु पाठ्यक्रमेषु अन्ते सत्रीयपरीक्षाः समचाल्यन्त ततः प्रथमद्वितीयाद्याः श्रेण्यः निर्धारिताः।

**पूरकपरीक्षाः** छात्राः सत्रीयपरीक्षायाः फले वृद्धिम् इच्छन्तः पूरकपरीक्षार्थम् आवेदयन्ति ते पाठ्यक्रमे अपेक्षिते पत्रे पूरकपरीक्षां दातुं शक्नुवन्ति। अनया प्रक्रियया पाठ्यक्रमाणां परिणामानां निष्पत्तिः सुकराभवति।

**प्रत्यादानम्** (Feedback) प्रत्येक पाठ्यक्रमस्य समाप्ती स्वीक्रियमाणं प्रत्यादानं पाठ्यक्रमाणां परिणाम निर्धारयति। विश्वविद्यालयद्वारा वैद्युतिकपत्रकेण प्रत्यादानं स्वीकृतम्।

**नियुक्तिः** विश्वविद्यालये पाठ्यक्रम समाप्य प्राप्तपदवीका विभिन्नेषु क्षेत्रेषु वृत्तिं लभन्ते शिक्षाशास्त्रिपाठ्यक्रम समाप्तवन्तः विविधराज्येषु प्रौढशालासु वृत्तिम् अलभन्त। वित्तकोषे केचन प्राप्नुवन्। अन्ये नागरिकसेवादिषु आत्मानं व्यापारयितुं प्रेरणाम

अलभन्त तत्परीक्षासु सिद्धतारता अभूवन्। NET, CTET इत्यादि उद्योगद्वारपरीक्षाः उत्तीर्णाः। बहवः योगः, वास्तु-ज्योतिषम् इत्यादीन कोशलाधारितपाठ्यक्रमान्समाप्य स्वयमुद्योगम् आरब्धवन्तः।

विश्वविद्यालयेन पाठ्यक्रमाणां परिणामानां निष्पत्तेश्च मापनं विहितम्। अत्र शास्त्रीआचार्यः, शिक्षाशास्त्री, विद्यावारिधिः प्रमाणपत्रम्, पदविका इत्येते पाठ्यक्रमाः सञ्चालिताः। एते पाठ्यक्रमाः निर्दिष्टोद्देशैः सहप्रवर्तिताः। उद्देशानुगुणं तेषां क्रियान्वयार्थ कार्याणि व्यधीयन्त प्रवेशकाले दत्तेन शास्त्रीयाणां पाठ्यक्रमाणां परिचयेन छात्राः विविधेषु शास्त्रेषु विभक्ताः अभवन्। नामितमापनेन आसक्तेः निर्धारण समपद्यत। शिक्षाशास्त्रिपाठ्यक्रमे मनोविज्ञानादिना अन्तरितमापनं भवति। छात्राः निर्दिष्टेविषये शून्याङ्क प्राप्तवन्तोऽपि प्रश्नान्तरे पृष्ठे अनं प्राप्नुवन्। पाठ्यक्रमेषु प्रतिसत्रं सत्रीयपरीक्षा प्राप्तं फलं वीक्ष्य आनुपातिक मापनं विहितम्। तेनपाठ्यक्रमे परिवर्तन परिवर्धनं च कर्तुं चिन्तनं सम्पन्नम्।

पाठ्यक्रमाणांयथोद्देशः परिणामः विश्वविद्यालयः अग्रवर्तिभिः इतरविश्वविद्यालयैः सहस्पर्धितुं समर्थः भवति। Covid 19 इत्यादिभिः विषमस्थितिभिः बहवः देशाः पीडिताः वर्तन्ते। भारतम्तदतिक्रान्तस्थितिं लब्धुं शक्नोति। समकाले **वसुधैव कुटुम्बकम्** इति सर्वोपादेयं तत्त्वं प्रसारयितुं समर्थं च भवति।